# Rajna Ashvashirasa Krita Narayana Stutih

# રાજ્ઞા અશ્વશિરસા કૃતા નારાયણસ્તુતિઃ

## Document Information

Text title : Rajna Ashvashirasa Krita Narayana Stutih

File name : rAjnAashvashirasAkRRitAnArAyaNastutiH.itx

Category : vishhnu, vishnu, stuti, varAhapurANa

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 5/46-55||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

# રાજ્ઞા અશ્વશિરસા કૃતા નારાયણસ્તુતિઃ

શ્રીવરાહઃ - (રાજા અશ્વશિરા) ઉવાચ ।
નમામિ યાજ્યં ત્રિદશાધિપસ્ય ભવસ્ય સૂર્યસ્ય હુતાશનસ્ય ।
સોમસ્ય રાજ્ઞો મરુતામનેકરૂપં હરિં યજ્ઞનરં નમસ્યે ॥ ૪૬॥

સુભીમદંષ્ટ્રં શશિસૂર્યનેત્રં સંવત્સરે ચાયનયુગ્મકુક્ષમ્ ।
દર્ભાઙ્ગરોમાણમથેધ્મશક્તિં સનાતનં યજ્ઞનરં નમામિ ॥ ૪૭॥

દ્યાવાપૃથિવ્યોરિદમન્તરં હિ વ્યાપ્તં શરીરેણ દિશશ્ચ સર્વાઃ ।
તમીડ્યમીશં જગતાં પ્રસૂતિં જનાર્દનં તં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૪૮॥

સુરાસુરાણાં ચ જયાજયાય યુગે યુગે યઃ સ્વશરીરમાદ્યમ્ ।
સૃજત્યનાદિઃ પરમેશ્વરો યસ્તં યજ્ઞમૂર્તિં પ્રણતોઽસ્મિ નાથમ્ ॥ ૪૯॥

દધાર માયામયમુગ્રતેજા જયાય ચક્રં ત્વમલાંશુશુભ્રમ્ ।
ગદાસિશાર્ઙ્ગાદિચતુર્ભુજોઽયં તં યજ્ઞમૂર્તિં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૫૦॥

ક્વચિત્ સહસ્રં શિરસાં દધાર ક્વચિન્મહાપર્વતતુલ્યકાયમ્ ।
ક્વચિત્સ એવ ત્રસરેણુતુલ્યો યસ્તં સદા યજ્ઞનરં નમામિ ॥ ૫૧॥

ચતુર્મુખો યઃ સૃજતે સમગ્રં રથાઙ્ગપાણિઃ પ્રતિપાલનાય ।
ક્ષયાય કાલાનલસન્નિભો યસ્તં યજ્ઞમૂર્તિં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૫૨॥

સંસારચક્રક્રમણક્રિયાયૈ ય ઇજ્યતે સર્વગતઃ પુરાણઃ ।
યો યોગિભિર્ધ્યાયતે ચાપ્રમેયસ્તં યજ્ઞમૂર્તિં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૫૩॥

સમ્યઙ્મનસ્યર્પિતવાનહં તે યદા સુદૃશ્યં સ્વતનૌ નુ તત્ત્વમ્ ।
ન ચાન્યદસ્તીતિ મતિઃ સ્થિરા મે યતસ્તતો માવતુ શુદ્ધભાવમ્ ॥ ૫૪॥

ઇતીરિતસ્તસ્ય હુતાશનાર્ચિઃ પ્રખ્યં તુ તેજઃ પુરતો બભૂવ ।
તસ્મિન્ સ રાજા પ્રવિવેશ બુદ્ધિં કૃત્વા લયં પ્રાપ્તવાન્ યજ્ઞમૂર્તૌ ॥ ૫૫॥

ઇતિ શ્રીવરાહપુરાણે પઞ્ચમાધ્યાયાન્તર્ગતા રાજ્ઞા અશ્વશિરસા કૃતા

નારાયણસ્તુતિઃ સમાપ્તા ॥

વરાહપુરાણ । અધ્યાય ૫/૪૬-૫૫॥

varAhapurANa . adhyAya 5/46-55..

Proofread by PSA Easwaran

*Rajna Ashvashirasa Krita Narayana Stutih*

pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*